# Shri Ganga Sahasranama stotram

# શ્રીગઙ્ગાસહસ્રનામસ્તોત્રમ્ ૨

## Document Information

Text title : Gangaasahasranama 2 from Brihaddharmapurana

File name : gangAsahasranAmastotrambrihaddharma.itx

Category : sahasranAma, devii, nadI, stotra, devI

Location : doc_devii

Proofread by : NA

Source : Brihaddharmapurana, Madhyakhanda, Adhyaya 50

Latest update : June 18, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 19, 2023

*sanskritdocuments.org*

# શ્રીગઙ્ગાસહસ્રનામસ્તોત્રમ્ ૨

શ્રીબૃહદ્ધર્મપુરાણાન્તર્ગતમ્ પઞ્ચાશત્તમોઽધ્યાયઃ

શ્રીશુક ઉવાચ ।
જય દેવી તદા ગઙ્ગા તપસ્યન્તં ભગીરથમ્ ।
આત્માનં દર્શયામાસ શ્વેતં ચારુચતુર્ભુજમ્ ॥ ૧॥ (શ્વેતરૂપાં ચતુર્ભુજાં)

તાં દૃષ્ટ્વા ધ્યાનમાત્રૈકલબ્ધાં દૃગ્ભ્યાઞ્ચ ભૂપતિઃ ।
અલભ્યલાભબોધેન બહુમેને નૃપોત્તમઃ ॥ ૨॥

હર્ષાકુલિતસર્વાઙ્ગો રોમાઞ્ચિતસુવિગ્રહઃ । હર્ષાદ્ગલિત
ગઙ્ગદાક્ષરયા વાચા ગઙ્ગાં તુષ્ટાવ ભૂપતિઃ ॥ ૩॥

સહસ્રનામભિર્દિવ્યૈઃ શક્તિં પરમદેવતામ્ ।
ભગીરથ ઉવાચ ।
અહં ભગીરથો રાજા દિલીપતનયઃ શિવે ॥ ૪॥

પ્રણમામિ પદદ્વન્દ્વં ભવત્યા અતિદુર્લભમ્ ।
પૂર્વજાનાં હિ પુણ્યેન તપસા પરમેણ ચ ॥ ૫॥

મચ્ચક્ષુર્ગોચરીભૂતા ત્વં ગઙ્ગા કરુણામયી ।
સાર્થકં સૂર્યવંશે મે જન્મ પ્રાપ્તં મહેશ્વરી ॥ ૬॥ (વંશો)

કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ ન સંશયઃ ।
નમો નમો નમસ્તેઽસ્તુ ગઙ્ગે રાજીવલોચને ॥ ૭॥

દેહોઽયં સાર્થકો મેઽસ્તુ સર્વાઙ્ગૈઃ પ્રણમામ્યહમ્ ।
સહસ્રનામભિઃ સ્તુત્વા વાચં સાર્થકયામ્યહમ્ ॥ ૮॥ (સહસ્રનામભિરિત્યાદિ)

શુક ઉવાચ ।
ગઙ્ગા સહસ્રનામ્નોઽસ્ય સ્તવસ્ય પુણ્યતેજસઃ ।
ઋષિર્વ્યાસસ્તથાઽનુષ્ટુપ્છન્દો વિપ્ર પ્રકીર્તિતમ્ ॥ ૯॥

સામૂલપ્રકૃતિર્દેવી ગઙ્ગા મે દેવતેરિતા ।
અશ્વમેધસહસ્રસ્ય રાજસૂયશતસ્ય ચ ॥ ૧૦॥

વાજપેયશતસ્યાઽપિ ગયાશ્રાદ્ધશતસ્ય ચ ।
બ્રહ્મહત્યાદિપાપાનાં ક્ષયે ચ પરદુષ્કરે ।
નિર્વાણમોક્ષલાભે ચ વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૧૧॥

અથ સહસ્રનામસ્તોત્રમ્ ।
ૐકારરૂપિણી દેવી શ્વેતા સત્યસ્વરૂપિણી ।
શાન્તિઃ શાન્તા ક્ષમા શક્તિઃ પરા પરમદેવતા ॥ ૧૨॥

વિષ્ણુર્નારાયણી કામ્યા કમનીયા મહાકલા ।
દુર્ગા દુર્ગતિસંહન્ત્રી ગઙ્ગા ગગણવાસિની ॥ ૧૩॥

શૈલેન્દ્રવાસિની દુર્ગવાસિની દુર્ગમપ્રિયા ।
નિરઞ્જના ચ નિર્લેશા નિષ્કલા નિરહઙ્ક્રિયા ॥ ૧૪॥ (નિર્લેપા)

પ્રસન્ના શુક્લદશના પરમાર્થા પુરાતની ।
નિરાકારા ચ શુદ્ધા ચ બ્રાહ્મણી બ્રહ્મરૂપિણી ॥ ૧૫॥ (બ્રહ્માણી)

દયા દયાવતી દીર્ઘા દીર્ઘવક્ત્રા દુરોદરા ।
શૈલકન્યા શૈલરાજવાસિની શૈલનન્દિની ॥ ૧૬॥

શિવા શૈવી શામ્ભવી ચ શઙ્કરી શઙ્કરપ્રિયા ।
મન્દાકિની મહાનન્દા સ્વર્ધુની સ્વર્ગવાસિની ॥ ૧૭॥

મોક્ષાખ્યા મોક્ષસરણિર્મુક્તિર્મુક્તિપ્રદાયિની ।
જલરૂપા જલમયી જલેશી જલવાસિની ॥ ૧૮॥ (જલવાહિની)

દીર્ઘજિહ્વા કરાલાક્ષી વિશ્વાખ્યા વિશ્વતોમુખી ।
વિશ્વકર્ણા વિશ્વદૃષ્ટિર્વિશ્વેશી વિશ્વવન્દિતા ॥ ૧૯॥

વૈષ્ણવી વિષ્ણુપાદાબ્જસમ્ભવા વિષ્ણુવાસિની ।
વિષ્ણુસ્વરૂપિણી વન્દ્યા બાલા વાણી બૃહત્તરા ॥ ૨૦॥

પીયૂષપૂર્ણા પીયૂષવાસિની મધુરદ્રવા ।
સરસ્વતી ચ યમુના ચ ગોદા ગોદાવરી વરી ॥ ૨૧॥ (તથા)

વરેણ્યા વરદા વીરા વરકન્યા વરેશ્વરી ।
બલ્લવી બલ્લવપ્રેષ્ઠા વાગીશ્વરા વારિરૂપિણી ॥ ૨૨॥

વારાહી વનસંસ્થા ચ વૃક્ષસ્થા વૃક્ષસુન્દરી ॥ ૨૩॥

વારુણી વરુણજ્યેષ્ઠા વરા વરુણવલ્લભા । વરુણશ્રેષ્ઠા
વરુણપ્રણતા દિવ્યા વરુણાનન્દકારિણી ॥ ૨૪॥

વન્દ્યા વૃન્દાવની વૃન્દારકેડ્યા વૃષવાહિની । વૃન્દા વૃષવાહિના
દાક્ષાયણી દક્ષકન્યા શ્યામા પરમસુન્દરી ॥ ૨૫॥

શિવપ્રિયા શિવારાધ્યા શિવમસ્તકવાસિની ।
શિવમસ્તકમસ્તા ચ વિષ્ણુપાદપદા તથા ॥ ૨૬॥

વિપત્તિકાસિની દુર્ગતારિણી તારિણીશ્વરી । વિપત્તિનાશિની
ગીતા પુણ્યચરિત્રા ચ પુણ્યનામ્ની શુચિશ્રવા ॥ ૨૭॥

શ્રીરામા રામરૂપા ચ રામચન્દ્રૈકચન્દ્રિકા ।
રાઘવી રઘુવંશેશી સૂર્યવંશપ્રતિષ્ઠિતા ॥ ૨૮॥

સૂર્યા સૂર્યપ્રિયા સૌરી સૂર્યમણ્ડલભેદિની ॥ ૨૯॥ (શૌરી)

ભગિની ભાગ્યદા ભવ્યા ભાગ્યપ્રાપ્યા ભગેશ્વરી ।
ભવ્યોચ્ચયોપલબ્ધા ચ કોટિજન્મતપઃફલા ॥ ૩૦॥

તપસ્વિની તાપસી ચ તપન્તી તાપનાશિની ।
તન્ત્રરૂપા તન્ત્રમયી તન્ત્રગોપ્યા મહેશ્વરી ॥ ૩૧॥

variations મન્દરૂપા મન્દમયી મન્દગોપ્યા મખેશ્વરી
        મન્ત્રરૂપા મન્ત્રમયી મન્ત્રગોપ્યા મખેશ્વરી

વિષ્ણુદેહદ્રવાકારા શિવગાનામૃતોદ્ભવા ।
આનન્દદ્રવરૂપા ચ પૂર્ણાનન્દમયી શિવા ॥ ૩૨॥

કોટિસૂર્યપ્રભા પાપધ્વાન્તસંહારકારિણી ।
પવિત્રા પરમા પુણ્યા તેજોધારા શશિપ્રભા ।
શશિકોટિપ્રકાશા ચ ત્રિજગદીપ્તિકારિણી ॥ ૩૩॥

સત્યા સત્યસ્વરૂપા ચ સત્યજ્ઞા સત્યસમ્ભવા ।
સત્યાશ્રયા સતી શ્યામા નવીના નરકાન્તકા ॥ ૩૪॥

સહસ્રશીર્ષા દેવેશી સહસ્રાક્ષી સહસ્રપાત્ ।
લક્ષવક્ત્રા લક્ષપાદા લક્ષહસ્તા વિલક્ષણા ॥ ૩૫॥

સદા નૂતનરૂપા ચ દુર્લભા સુલભા શુભા ।

રક્તવર્ણા ચ રક્તાક્ષી ત્રિનેત્રા શિવસુન્દરી ॥ ૩૬॥

ભદ્રકાલી મહાકાલી લક્ષ્મીર્ગગણવાસિની ।
મહાવિદ્યા શુદ્ધવિદ્યા મન્ત્રરૂપા સુમન્ત્રિતા ॥ ૩૭॥

રાજસિંહાસનતટા રાજરાજેશ્વરી રમા ।
રાજકન્યા રાજપૂજ્યા મન્દમારુતચામરા ॥ ૩૮॥

વેદવન્દિપ્રગીતા ચ વેદવન્દિપ્રવન્દિતા ।
વેદવન્દિસ્તુતા દિવ્યા વેદવન્દિસુવર્ણિતા ॥ ૩૯॥

સુવર્ણા વર્ણનીયા ચ સુવર્ણગાનનન્દિતા ।
સુવર્ણદાનલભ્યા ચ ગાનાનન્દપ્રિયાઽમલા ॥ ૪૦॥

માલા માલાવતી માલ્યા માલતી કુસુમપ્રિયા । માન્યા
દિગમ્બરી દુષ્ટહન્ત્રી સદા દુર્ગમવાસિની ॥ ૪૧॥

અભયા પદ્મહસ્તા ચ પીયૂષકરશોભિતા ।
ખડ્ગહસ્તા ભીમરૂપા શ્યેની મકરવાહિની ॥ ૪૨॥

શુદ્ધસ્રોતા વેગવતી મહાપાષાણભેદિની ।
પાપાલી રોદનકરી પાપસંહારકારિણી ॥ ૪૩॥

યાતનાય ચ વૈધવ્યદાયિની પુણ્યવર્ધિની ।
ગભીરાઽલકનન્દા ચ મેરુશ‍ૃઙ્ગવિભેદિની ॥ ૪૪॥

સ્વર્ગલોકકૃતાવાસા સ્વર્ગસોપાનરૂપિણી ।
સ્વર્ગઙ્ગા પૃથિવીગઙ્ગા નરસેવ્યા નરેશ્વરી ॥ ૪૫॥

સુબુદ્ધિશ્ચ કુબુદ્ધિશ્ચ શ્રીર્લક્ષ્મીઃ કમલાલયા ॥ ૪૬॥

પાર્વતી મેરુદૌહિત્રી મેનકાગર્ભસમ્ભવા ।
અયોનિસમ્ભવા સૂક્ષ્મા પરમાત્મા પરત્ત્વદા ॥ ૪૭॥

વિષ્ણુજા વિષ્ણુજનિકા વિષ્ણુપાદનિવાસિની । શિવમસ્તકવાસિની
દેવી વિષ્ણુપદી પદ્મા જાહ્નવી પદ્મવાસિની ॥ ૪૮॥

પદ્મા પદ્માવતી પદ્મધારિણી પદ્મલોચના ।
પદ્મપાદા પદ્મમુખી પદ્મનાભા ચ પદ્મિની ॥ ૪૯॥

પદ્મગર્ભા પદ્મશયા મહાપદ્મગુણાધિકા ।

પદ્માક્ષી પદ્મલલિતા પદ્મવર્ણા સુપદ્મિની ॥ ૫૦॥

સહસ્રદલપદ્મસ્થા પદ્માકરનિવાસિની ।
મહાપદ્મપુરસ્થા ચ પુરેશી પરમેશ્વરી ॥ ૫૧॥

હંસી હંસવિભૂષા ચ હંસરાજવિભૂષણા ।
હંસરાજસુવર્ણા ચ હંસારૂઢા ચ હંસિની ॥ ૫૨॥

હંસાક્ષરસ્વરૂપા ચ દ્વ્યક્ષરા મન્ત્રરૂપિણી ।
આનન્દજલસમ્પૂર્ણા શ્વેતવારિપ્રપૂરિકા ॥ ૫૩॥

અનયાસસદામુક્તિર્યોગ્યાઽયોગ્યવિચારિણી ॥ ૫૪॥

તેજોરૂપજલાપૂર્ણા તૈજસી દીપ્તિરૂપિણી ।
પ્રદીપકલિકાકારા પ્રાણાયામસ્વરૂપિણી ॥ ૫૫॥

પ્રાણદા પ્રાણનીયા ચ મહૌષધસ્વરૂપિણી । મહૌષધિસ્વરૂપિણી
મહૌષધજલા ચૈવ પાપરોગચિકિત્સકા ॥ ૫૬॥ (પાપરોગચિકિત્સિકા)

કોટિજન્મતપોલક્ષ્યા પ્રાણત્યાગોત્તરાઽમૃતા ।
નિઃસન્દેહા નિર્મહિમા નિર્મલા મલનાશિની ॥ ૫૭॥

શવારૂઢા શવસ્થાનવાસિની શવવત્તટી ।
શ્મશાનવાસિની કેશકીકસાચિતતીરિણી ॥ ૫૮॥

ભૈરવી ભૈરવશ્રેષ્ઠસેવિતા ભૈરવપ્રિયા ।
ભૈરવપ્રાણરૂપા ચ વીરસાધનવાસિની ॥ ૫૯॥

વીરપ્રિયા વીરપત્ની કુલીના કુલપણ્ડિતા ।
કુલવૃક્ષસ્થિતા કૌલી કુલકોમલવાસિની ॥ ૬૦॥

કુલદ્રવપ્રિયા કુલ્યા કુલ્યમાલાજપપ્રિયા ।
કૌલદા કુલરક્ષિત્રી કુલવારિસ્વરૂપિણી ॥ ૬૧॥

રણશ્રીઃ રણભૂઃ રમ્યા રણોત્સાહપ્રિયા રણે । બલિઃ
નૃમુણ્ડમાલાભરણા નૃમુણ્ડકરધારિણી ॥ ૬૨॥

વિવસ્ત્રા ચ સવસ્ત્રા ચ સૂક્ષ્મવસ્ત્રા ચ યોગિની ।
રસિકા રસરૂપા ચ જિતાહારા જિતેન્દ્રિયા ॥ ૬૩॥

યામિની ચાર્ધરાત્રસ્થા કૂર્ચ્ચવીજસ્વરૂપિણી ।

લજ્જાશક્તિશ્ચ વાગ્રૂપા નારી નરકહારિણી ॥ ૬૪॥ (લજ્જાશાન્તિ, નરકવાહિની)

તારા તારસ્વરાઢ્યા ચ તારિણી તારરૂપિણી ।
અનન્તા ચાદિરહિતા મધ્યશૂન્યાસ્વરૂપિણી ॥ ૬૫॥

નક્ષત્રમાલિની ક્ષીણા નક્ષત્રસ્થલવાસિની ।
તરુણાદિત્યસઙ્કાશા માતઙ્ગી મૃત્યુવર્જિતા ॥ ૬૬॥

અમરામરસંસેવ્યા ઉપાસ્યા શક્તિરૂપિણી ।
ધૂમાકારાગ્નિસમ્ભૂતા ધૂમા ધૂમાવતી રતિઃ ॥ ૬૭॥

કામાખ્યા કામરૂપા ચ કાશી કાશીપુરસ્થિતા ।
વારાણસી વારયોષિત્ કાશીનાથશિરઃસ્થિતા ॥ ૬૮॥

અયોધ્યા મથુરા માયા કાશી કાઞ્ચી હ્યવન્તિકા ।
દ્વારકા જ્વલદગ્નિશ્ચ કેવલા કેવલત્વદા ॥ ૬૯॥

કરવીરપુરસ્થા ચ કાવેરી કવરી શિવા ।
રક્ષિણી ચ કરાલાક્ષી કઙ્કાલા શઙ્કરપ્રિયા ॥ ૭૦॥

જ્વાલામુખી ક્ષીરિણી ચ ક્ષીરગ્રામનિવાસિની ।
રક્ષાકરી દીર્ઘકર્ણા સુદન્તાદન્તવર્જિતા ॥ ૭૧॥

દૈત્યદાનવસંહન્ત્રી દુષ્ટહન્ત્રી બલિપ્રિયા ।
બલિમાંસપ્રિયા શ્યામા વ્યાઘ્રચર્માપિધાયિની ॥ ૭૨॥

જવાકુસુમસઙ્કાશા સાત્ત્વિકી રાજસી તથા ।
તામસી તરુણી વૃદ્ધા યુવતી બાલિકા તથા ॥ ૭૩॥

યક્ષરાજસુતા જામ્બુમાલિની જમ્બુવાસિની ।
જામ્બૂનદવિભૂષા ચ જ્વલજામ્બૂનદપ્રભા ॥ ૭૪॥

રુદ્રાણી રુદ્રદેહસ્થા રુદ્રા રુદ્રાક્ષધારિણી ।
અણુશ્ચ પરમાણુશ્ચ હ્રસ્વા દીર્ઘા ચકોરિણી ॥ ૭૫॥

રુદ્રગીતા વિષ્ણુગીતા મહાકાવ્યસ્વરૂપિણી ।
આદિકાવ્યસ્વરૂપા ચ મહાભારતરૂપિણી ॥ ૭૬॥

અષ્ટાદશપુરાણસ્થા ધર્મમાતા ચ ધર્મિણી ।
માતા માન્યા સ્વસા ચૈવ શ્વશ્રૂશ્ચૈવ પિતામહી ॥ ૭૭॥

ગુરુશ્ચ ગુરુપત્ની ચ કાલસર્પભયપ્રદા ।
પિતામહસુતા સીતા શિવસીમન્તિની શિવા ॥ ૭૮॥

રુક્મિણી રુક્મવર્ણા ચ ભૈષ્મી ભૈમી સુરૂપિણી । સ્વરૂપિણી
સત્યભામા મહાલક્ષ્મી ભદ્રા જામ્બવતી મહી ॥ ૭૯॥

નન્દા ભદ્રમુખી રિક્તા જયા વિજયદા જયા ।
જયિત્રી પૂર્ણિમા પૂર્ણા પૂર્ણચન્દ્રનિભાનના ॥ ૮૦॥

ગુરુપૂર્ણા સૌમ્યભદ્રા વિષ્ટિઃ સંવેશકારિણી ।
શનિરિક્તા કુજજયા સિદ્ધિદા સિદ્ધિરૂપિણી ॥ ૮૧॥

અમૃતાઽમૃતરૂપા ચ શ્રીમતી ચ જલામૃતા ॥ ૮૨॥

નિરાતઙ્કા નિરાલમ્બા નિષ્પ્રપઞ્ચા વિશેષિણી ।
નિષેધશેષરૂપા ચ વરિષ્ઠા યોષિતાંવરા ॥ ૮૩॥

યશસ્વિની કીર્તિમતી મહાશૈલાગ્રવાસિની ।
ધરા ધરિત્રી ધરણી સિન્ધુર્બન્ધુઃ સબાન્ધવા ॥ ૮૪॥

સમ્પત્તિઃ સમ્પદીશા ચ વિપત્તિપરિમોચિની ।
જન્મપ્રવાહહરણી જન્મશૂન્યા નિરઞ્જની ॥ ૮૫॥

નાગાલયાલયા નીલા જટામણ્ડલધારિણી ।
સુતરઙ્ગજટાજૂટા જટાધરશિરઃસ્થિતા ॥ ૮૬॥

પટ્ટામ્બરધરા ધીરા કવિઃ કાવ્યરસપ્રિયા ।
પુણ્યક્ષેત્રા પાપહરા હરિણી હારિણી હરિઃ ॥ ૮૭॥

હરિદ્રાનગરસ્થા ચ વૈદ્યનાથપ્રિયા બલિઃ ।
વક્રેશ્વરી વક્રધારા વક્રેશ્વરપુરઃસ્થિતા ॥ ૮૮॥

શ્વેતગઙ્ગા શીતલા ચ ઉષ્મોદકમયી રુચિઃ । ઉષ્ણોદકમયી
ચોલરાજપ્રિયકરી ચન્દ્રમણ્ડલવર્ત્તિની ॥ ૮૯॥

આદિત્યમણ્ડલગતા સદાદિત્યા ચ કાશ્યપી ।
દહનાક્ષી ભયહરા વિષજ્વાલાનિવારિણી ॥ ૯૦॥

હરા દશહરા સ્નેહદાયિની કલુષાશનિઃ ।
કપાલમાલિની કાલી કલા કાલસ્વરૂપિણી ॥ ૯૧॥

ઇન્દ્રાણી વારુણિ વાણી બલાકા બાલશઙ્કરી ।
ગોર્ગીર્હ્રીર્ધર્મરૂપા ચ ધીઃ શ્રીર્ધન્યા ધનઞ્જયા ॥ ૯૨॥

વિત્ સંવિત્ કુઃ કુવેરી ભૂર્ભૂતિર્ભૂમિધરાધરા ।
ઈશ્વરી હ્રીમતી ક્રીડા ક્રીડાસાયા જયપ્રદા ॥ ૯૩॥

જીવન્તી જીવની જીવા જયાકારા જયેશ્વરી ।
સર્વોપદ્રવસંશૂન્યા સર્વપાપવિવર્જિતા ॥ ૯૪॥

સાવિત્રી ચૈવ ગાયત્રી ગણેશી ગણવન્દિતા ।
દુષ્પ્રેક્ષા દુષ્પ્રવેશા ચ દુર્દર્શા ચ સુયોગિણી ॥ ૯૫॥

દુઃખહન્ત્રી દુઃખહરા દુર્દાન્તા યમદેવતા ।
ગૃહદેવી ભૂમિદેવી વનેશી વનદેવતા ॥ ૯૬॥

ગુહાલયા ઘોરરૂપા મહાઘોરનિતમ્બિની । ગૃહાલયા
સ્ત્રીચઞ્ચલા ચારુમુખી ચારુનેત્રા લયાત્મિકા ॥ ૯૭॥

કાન્તિઃ કામ્યા નિર્ગુણા ચ રજઃસત્ત્વતમોમયી । કાન્તિકામ્યા
કાલરાત્રિર્મહારાત્રિર્જીવરૂપા સનાતની ॥ ૯૮॥

સુખદુઃખાદિભોક્ત્રી ચ સુખદુઃખાદિવર્જિતા ।
મહાવૃજિનસંહારા વૃજિનધ્વાન્તમોચની ॥ ૯૯॥

હલિની ખલહન્ત્રી ચ વારુણીપાનકારિણી । પાપકારિણી
નિદ્રાયોગ્યા મહાનિદ્રા યોગનિદ્રા યુગેશ્વરી ॥ ૧૦૦॥

ઉદ્ધારયિત્રી સ્વર્ગઙ્ગા ઉદ્ધારણપુરઃસ્થિતા ।
ઉદ્ધૃતા ઉદ્ધૃતાહારા લોકોદ્ધારણકારિણી ॥ ૧૦૧॥

શઙ્ખિની શઙ્ખધાત્રી ચ શઙ્ખવાદનકારિણી । શઙ્ખધારી
શઙ્ખેશ્વરી શઙ્ખહસ્તા શઙ્ખરાજવિદારિણી ॥ ૧૦૨॥

પશ્ચિમાસ્યા મહાસ્રોતા પૂર્વદક્ષિણવાહિની ।
સાર્ધયોજનવિસ્તીર્ણા પાવન્યુત્તરવાહિની ॥ ૧૦૩॥

પતિતોદ્ધારિણી દોષક્ષમિણી દોષવર્જિતા ।
શરણ્યા શરણા શ્રેષ્ઠા શ્રીયુતા શ્રાદ્ધદેવતા ॥ ૧૦૪॥

સ્વાહા સ્વધા સ્વરૂપાક્ષી સુરૂપાક્ષી શુભાનના । વિરૂપાક્ષી
કૌમુદી કુમુદાકારા કુમુદામ્બરભૂષણા ॥ ૧૦૫॥

સૌમ્યા ભવાની ભૂતિસ્થા ભીમરૂપા વરાનના ।
વરાહકર્ણા બર્હિષ્ઠા બૃહચ્છ્રોણી બલાહકા ॥ ૧૦૬॥ (વરાહવર્ણા)

વેશિની કેશપાશાઢ્યા નભોમણ્ડલવાસિની ।
મલ્લિકા મલ્લિકાપુષ્પવર્ણા લાઙ્ગલધારિણી ॥ ૧૦૭॥

તુલસીદલગન્ધાઢ્યા તુલસીદામભૂષણા ।
તુલસીતરુસંસ્થા ચ તુલસીરસલેહિની । તુલસીરસગેહિની
તુલસીરસસુસ્વાદુસલિલા વિલ્વવાસિની ॥ ૧૦૮॥

વિલ્વવૃક્ષનિવાસા ચ વિલ્વપત્રરસદ્રવા ।
માલૂરપત્રમાલાઢ્યા વૈલ્વી શૈવાર્ધદેહિની ॥ ૧૦૯॥

અશોકા શોકરહિતા શોકદાવાગ્નિહૃજ્જલા ।
અશોકવૃક્ષનિલયા રમ્ભા શિવકરસ્થિતા ॥ ૧૧૦॥

દાડિમી દાડિમીવર્ણા દાડિમસ્તનશોભિતા ।
રક્તાક્ષી વીરવૃક્ષસ્થા રક્તિની રક્તદન્તિકા ॥ ૧૧૧॥

રાગિણી રાગભાર્યા ચ સદારાગવિવર્જિતા ।
વિરાગરાગસમ્મોદા સર્વરાગસ્વરૂપિણી ॥ ૧૧૨॥

તાનસ્વરૂપિણી તાલરૂપિણી તારકેશ્વરી ॥ ૧૧૩॥ (તાલસ્વરૂપિણી તાલકેશરી)

વાલ્મીકિશ્લોકિતાષ્ટેડ્યા હ્યનન્તમહિમાદિમા । લોકિતાષ્ટોધા
માતા ઉમા સપત્ની ચ ધરાહારાવલિઃ શુચિઃ ॥ ૧૧૪॥ (હારાવલી)

સ્વર્ગારોહપતાકા ચ ઇષ્ટા ભાગીરથી ઇલા ।
સ્વર્ગભીરામૃતજલા ચારુવીચિસ્તરઙ્ગિણી ॥ ૧૧૫॥

બ્રહ્મતીરા બ્રહ્મજલા ગિરિદારણકારિણી ।
બ્રહ્માણ્ડભેદિની ઘોરનાદિની ઘોરવેગિની ॥ ૧૧૬॥

બ્રહ્માણ્ડવાસિની ચૈવ સ્થિરવાયુપ્રભેદિની ।
શુક્રધારામયી દિવ્યશઙ્ખવાદ્યાનુસારિણી ॥ ૧૧૭॥

ઋષિસ્તુતા શિવસ્તુત્યા ગ્રહવર્ગપ્રપૂજિતા । સુરસ્તુત્યા
સુમેરુશીર્ષનિલયા ભદ્રા સીતા મહેશ્વરી ॥ ૧૧૮॥

વઙ્ક્ષુશ્ચાલકનન્દા ચ શૈલસોપાનચારિણી ।

લોકાશાપૂરણકરી સર્વમાનસદોહની ॥ ૧૧૯॥

ત્રૈલોક્યપાવની ધન્યા પૃથ્વીરક્ષણકારિણી ।
ધરણી પાર્થિવી પૃથ્વી પૃથુકીર્તિર્નિરામયા ॥ ૧૨૦॥

બ્રહ્મપુત્રી બ્રહ્મકન્યા બ્રહ્મમાન્યા વનાશ્રયા ।
બ્રહ્મરૂપા વિષ્ણુરૂપા શિવરૂપા હિરણ્મયી ॥ ૧૨૧॥

બ્રહ્મવિષ્ણુશિવત્વાઢ્યા બ્રહ્મવિષ્ણુશિવત્વદા ।
મજ્જજ્જનોદ્ધારિણી ચ સ્મરણાર્તિવિનાશિની ॥ ૧૨૨॥

સ્વર્ગદાયિસુખસ્પર્શા મોક્ષદર્શનદર્પણા । સ્વર્ગદાત્રી
આરોગ્યદાયિની નીરુક્ નાનાતાપવિનાશિની ॥ ૧૨૩॥

તાપોત્સારણશીલા ચ તપોધામા શ્રમાપહા । તપોધાના
સર્વદુઃખપ્રશમની સર્વશોકવિમોચની ॥ ૧૨૪॥

સર્વશ્રમહરા સર્વસુખદા સુખસેવિતા ।
સર્વપ્રાયશ્ચિત્તમયી વાસમાત્રમહાતપાઃ ॥ ૧૨૫॥

સતનુર્નિસ્તનુસ્તન્વી તનુધારણવારિણી ।
મહાપાતકદાવાગ્નિઃ શીતલા શશધારિણી ॥ ૧૨૬॥

ગેયા જપ્યા ચિન્તનીયા ધ્યેયા સ્મરણલક્ષિતા ।
ચિદાનન્દસ્વરૂપા ચ જ્ઞાનરૂપાગમેશ્વરી ॥ ૧૨૭॥

આગમ્યા આગમસ્થા ચ સર્વાગમનિરૂપિતા ।
ઇષ્ટદેવી મહાદેવી દેવનીયા દિવિસ્થિતા ॥ ૧૨૮॥

દન્તાવલગૃહી સ્થાત્રી શઙ્કરાચાર્યરૂપિણી । દન્તીવલગૃહસ્થાત્રી
શઙ્કરાચાર્યપ્રણતા શઙ્કરાચાર્યસંસ્તુતા ॥ ૧૨૯॥

શઙ્કરાભરણોપેતા સદા શઙ્કરભૂષણા ।
શઙ્કરાચારશીલા ચ શઙ્ક્યા ચ શઙ્કરેશ્વરી ॥ ૧૩૦॥

શિવસ્રોતાઃ શમ્ભુમુખી ગૌરી ગગણગેહિની । ગગણદેહિની
દુર્ગમા સુગમા ગોપ્યા ગોપિની ગોપવલ્લભા ॥ ૧૩૧॥ (ગોપની)

ગોમતી ગોપકન્યા ચ યશોદાનન્દનન્દિની ।
કૃષ્ણાનુજા કંસહન્ત્રી બ્રહ્મરાક્ષસમોચની ।
શાપસમ્મોચની લઙ્કા લઙ્કેશી ચ વિભીષણા ॥ ૧૩૨॥

વિભીષાભરણીભૂષા હારાવલિરનુત્તમા । વિભીષાભૂષણીભૂષા
તીર્થસ્તુતા તીર્થવન્દ્યા મહાતીર્થઞ્ચ તીર્થસૂઃ ॥ ૧૩૩ ॥ (મહાતીર્થા ચ)

કન્યા કલ્પલતા કેલીઃ કલ્યાણી કલ્પવાસિની
કલિકલ્મષસંહન્ત્રી કાલકાનનવાસિની ।
કાલસેવ્યા કાલમયી કાલિકા કામુકોત્તમા
કામદા કારણાખ્યા ચ કામિની કીર્તિધારિણી ॥ ૧૩૪ ॥

કોકામુખી કોરકાક્ષી કુરઙ્ગનયની કરિઃ । કોટરાક્ષી
કજ્જલાક્ષી કાન્તિરૂપા કામાખ્યા કેશરિસ્થિતા ॥ ૧૩૫ ॥

ખગા ખલપ્રાણહરા ખલદૂરકરા ખલા ।
ખેલન્તી ખરવેગા ચ ખકારવર્ણવાસિની ॥ ૧૩૬ ॥

ગઙ્ગા ગગણરૂપા ચ ગગણાધ્વપ્રસારિણી ।
ગરિષ્ઠા ગણનીયા ચ ગોપાલી ગોગણસ્થિતા ॥ ૧૩૭ ॥

ગોપૃષ્ઠવાસિની ગમ્યા ગભીરા ગુરુપુષ્કરા ।
ગોવિન્દા ગોસ્વરૂપા ચ ગોનામ્ની ગતિદાયિની ॥ ૧૩૮ ॥

ઘૂર્ણમાના ઘર્મહરા ઘૂર્ણત્સ્રોતા ઘનોપમા । ઘૂર્ણહરા
ઘૂર્ણાખ્યદોષહરણી ઘૂર્ણયન્તી જગત્ત્રયમ્ ॥ ૧૩૯ ॥ (ઘૂર્ણાક્ષી)

ઘોરા ઘૃતોપમજલા ઘર્ઘરારવઘોષિણી । ઘોષણી
ઘોરાઙ્ઘોઘાતિની ઘુવ્યા ઘોષા ઘોરાઘહારિણી ॥ ૧૪૦ ॥ (ઘોરાઘઘારિણી)

ઘોષરાજી ઘોષકન્યા ઘોષનીયા ઘનાલયા ।
ઘણ્ટાટઙ્કારઘટિતા ઘાઙ્કારી ઘઙ્ઘચારિણી ॥ ૧૪૧ ॥

ઙાન્તા ઙકારિણી ઙેશી ઙકારવર્ણસંશ્રયા ।
ચકોરનયની ચારુમુખી ચામરધારિણી ॥ ૧૪૨ ॥

ચન્દ્રિકા શુક્લસલિલા ચન્દ્રમણ્ડલવાસિની ।
ચૌકારવાસિની ચર્ચ્ચા ચમરી ચર્મવાસિની ॥ ૧૪૩ ॥ (ચોહારવાસિની ચર્ચા)

ચર્મહસ્તા ચન્દ્રમુખી ચુચુકદ્વયશોભિની । ચન્દ્રહસ્તા
છત્રિલા છત્રિતાઘાવિશ્છત્રચામરશોભિતા ॥ ૧૪૪ ॥ (છત્રિની છત્રિતા ધારિ)

છત્રિતા છદ્મસહન્ત્રી ડુરિત બ્રહ્મરૂપિણી । છુરિતુર્બ્રહ્મરૂપિણી

છાયા ચ સ્થલશૂન્યા ચ છલયન્તી છલાન્વિતા ॥ ૧૪૫॥ (છલશૂન્યા)

છિન્નમસ્તા છલધરા છવર્ણા છુરિતા છવિઃ । છવિતા
જીમૂતવાસિની જિહ્વા જવાકુસુમસુન્દરી ॥ ૧૪૬॥

જરાશૂન્યા જયા જ્વાલા જવિની જીવનેશ્વરી ।
જ્યોતીરૂપા જન્મહરા જનાર્દનમનોહરા ॥ ૧૪૭॥

ઝઙ્કારકારિણી ઝઞ્ઝા ઝર્ઝરીવાદ્યવાદિની ।
ઝણન્નૂપુરસંશબ્દા ઝરા બ્રહ્મઝરા ઝરા ॥ ૧૪૮॥

ઙ્કારેશી ઙ્કારસ્થા ઞ્વર્ણમધ્યનામિકા ।
ટઙ્કારકારિણી ટઙ્કુધારિણી ટુણ્ઠુકાટલા ॥ ૧૪૯॥ (ટુણ્ટુકાટકા)

ઠક્કુરાણી ટહ્દ્વયેશી ઠઙ્કારી ઠક્કુરપ્રિયા ।
ડામરી ડામરાધીશા ડામરેશશિરઃસ્થિતા ॥ ૧૫૦॥

ડમરુધ્વનિનૃત્યન્તી ડાકિનીભયહારિણી ।
ડીના ડયિત્રી ડિણ્ડી ચ ડિણ્ડીધ્વનિસદાસ્પૃહા ॥ ૧૫૧॥

ઢક્કારવા ચ ઢક્કારી ઢક્કાવાદનભૂષણા । ઢક્કાવનાદભૂષણા
ણકારવર્ણધવલા ણકારી યાનભાવિની ॥ ૧૫૨॥ (વર્ણપ્રવણા યાણ)

તૃતીયા તીવ્રપાપઘ્ની તીવ્રા તરણિમણ્ડલા ।
તુષારકતુલાસ્યા ચ તુષારકરવાસિની ॥ ૧૫૩॥ (તુષારકરતુલ્યા સ્યાત્)

થકારાક્ષી થવર્ણસ્થા દન્દશૂકવિભૂષણા । મકરાક્ષી
દીર્ઘચક્ષુર્દીર્ઘધારા ધનરૂપા ધનેશ્વરી ॥ ૧૫૪॥

દૂરદૃષ્ટિર્દૂરગમા દૃતગન્ત્રી દ્રવાશ્રયા ।
નારીરૂપા નીરજાક્ષી નીરરૂપા નરોત્તમા ॥ ૧૫૫॥

નિરઞ્જના ચ નિર્લેપા નિષ્કલા નિરહઙ્ક્રિયા ।
પરા પરાયણા પક્ષા પારાયણપરાયણા ।
પારયિત્રી પણ્ડિતા ચ પણ્ડા પણ્ડિતસેવિતા ॥ ૧૫૬॥ (પારયત્રી)

પરા પવિત્રા પુણ્યાખ્યા પાલિકા પીતવાસિની । પાણિકા
ફુત્કારદૂરદુરિતા ફાલયન્તી ફણાશ્રયા ॥ ૧૫૭॥

ફેનિલા ફેનદશના ફેના ફેનવતી ફણા ।
ફેત્કારિણી ફણિધરા ફણિલોકનિવાસિની ॥ ૧૫૮॥

ફાણ્ટાકૃતાલયા ફુલ્લા ફુલ્લારવિન્દલોચના ।
વેણીધરા બલવતી વેગવતિધરાવહા ॥ ૧૫૯॥

વન્દારુવન્દ્યા વૃન્દેશી વનવાસા વનાશયા । વનાશ્રયા
ભીમરાજી ભીમપત્ની ભવશીર્ષકૃતાલયા ॥ ૧૬૦॥

ભાસ્કરા ભાસ્કરધરા ભૂષા ભાસ્કરવાદિની । ભાઙ્કારવાદિની
ભયઙ્કરી ભયહરા ભીષણા ભૂમિભેદિની ॥ ૧૬૧॥

ભગભાગ્યવતી ભવ્યા ભવદુઃખનિવારિણી ।
ભેરુણ્ડા ભીમસુગમા ભદ્રકાલી ભવસ્થિતા ॥ ૧૬૨॥ (ભેરુસુગમા)

મનોરમા મનોજ્ઞા ચ મૃતમોક્ષા મહામતિઃ ।
મતિદાત્રી મતિહરા મટસ્થા મોક્ષરૂપિણી ॥ ૧૬૩॥

યમપૂજ્યા યજ્ઞરૂપા યજમાના યમસ્વસા । યજમાની
યમદણ્ડસ્વરૂપા ચ યમદણ્ડહરા યતિઃ ॥ ૧૬૪॥

રક્ષિકા રાત્રિરૂપા ચ રમણીયા રમા રતિઃ ।
લવઙ્ગી લેશરૂપા ચ લેશનીયા લયપ્રદા ॥ ૧૬૫॥

વિબુદ્ધા વિષહસ્તા ચ વિશિષ્ટા વેશધારિણી ।
શ્યામરૂપા શરત્કન્યા શારદી શવલા શ્રુતા ॥ ૧૬૬॥ (શરણા શરલા)

શ્રુતિગમ્યા શ્રુતિસ્તુત્યા શ્રીમુખી શરણપ્રદા । શરણપ્રિયા
ષષ્ઠી ષટ્કોણનિલયા ષટ્કર્મપરિસેવિતા ॥ ૧૬૭॥

સાત્ત્વિકી સત્વસરણિઃ સાનન્દા સુખરૂપિણી । સત્યસરણિઃ
હરિકન્યા હરિજલા હરિદ્વર્ણા હરીશ્વરી ॥ ૧૬૮॥ (હરેશ્વરી)

ક્ષેમઙ્કરી ક્ષેમરૂપા ક્ષુરધારામ્બુલેશિની ।
અનન્તા ઇન્દિરા ઈશા ઉમા ઊષા ઋવર્ણિકા ॥ ૧૬૯॥

ૠસ્વરૂપા ળ્કારસ્થા ળ્કારી એષિતા તથા । એધિતા એષિકા
ઐશ્વર્યદાયિની ઓકારિણી ઔમકકારિણી ॥ ૧૭૦॥

અન્તશૂન્યા અઙ્કધરા અસ્પર્શા અસ્ત્રધારિણી ।
સર્વવર્ણમયી વર્ણબ્રહ્મરૂપાખિલાત્મિકા ॥ ૧૭૧॥

પ્રસન્ના શુક્લદશના પરમાર્થા પુરાતની ।

શુક ઉવાચ ।
ઇમં સહસ્રનામાખ્યં ભગીરથકૃતં પુરા ।
ભગવત્યા હિ ગઙ્ગાયા મહાપુણ્યં જયપ્રદમ્ ॥ ૧૭૨॥

યઃ પઠેચ્છૃણુયાદ્વાપિ ભક્ત્યા પરમયા યુતઃ । પઠેદ્વા પાઠયેદ્વાપિ
તસ્ય સર્વં સુસિદ્ધં સ્યાદ્વિનિયુક્તં ફલં દ્વિજ ॥ ૧૭૩॥

ગઙ્ગૈવ વરદા તસ્ય ભવેત્ સર્વાર્થદાયિની ।
જ્યૈષ્ઠે દશહરાતિથ્યાં પૂજયિત્વા સદાશિવામ્ ॥ ૧૭૪॥

દુર્ગોત્સવ વિધાનેન વિધિના ગમિકેન વા ।
ગઙ્ગા સહસ્રનામાખ્યં સ્તવમેનમુદાહરેત્ ॥ ૧૭૫॥

તસ્ય સંવત્સરં દેવી ગહે બદ્ધૈવ તિષ્ઠતિ ।
પુત્રોત્સવે વિવાહાદૌ શ્રાદ્ધાહે જન્મવાસરે ॥ ૧૭૬॥

પઠેદ્વા શ઼ૃણુયાદ્વાપિ તત્તત્કર્માક્ષયં ભવેત્ ।
ધનાર્થીધનમાપ્નોતિ લભેદ્ભાર્યામભાર્યકઃ ॥ ૧૭૭॥

અપુત્રો લભતે પુત્રં ચાતુર્વર્ણ્યાર્થસાધકમ્ । પુત્રાન્ સાધિકમ્
યુગાદ્યાસુ પૂર્ણિમાસુ રવિસઙ્ક્રમણે તથા ॥ ૧૭૮॥

દિનક્ષયે વ્યતીપાતે પુષ્યાયાં હરિવાસરે ।
અમાવાસ્યાસુ સર્વાસુ અતિથૌ ચ સમાગતે ॥ ૧૭૯॥

શુશ્રૂષૌ સતિ સત્સઙ્ગે ગવાં સ્થાનગતોઽપિ વા । સદ્વઙ્ગે
મણ્ડલે બ્રાહ્મણાનાઞ્ચ પઠેદ્વા શ઼ૃણુયાત્ સ્તવમ્ ॥ ૧૮૦॥

સ્તવેનાનેન સા ગઙ્ગા મહારાજે ભગીરથે ।
બભૂવ પરમપ્રીતા તપોભિઃ પૂર્વજૈર્યથા ॥ ૧૮૧॥

તસ્માદ્યો ભક્તિભાવેન સ્તવેનાનેન સ્તૌતિ ચ ।
તસ્યાપિ તાદૃશી પ્રીતા સગરાદિતપો યથા ।
સ્તવેનાનેન સન્તુષ્ટા દેવી રાજ્ઞે વરં દદૌ ॥ ૧૮૨॥

દેવ્યુવાચ ।
વરમ્વરય ભૂપાલ વરદાસ્મિ તવાગતા ।
જાને તવ હૃદિસ્થઞ્ચ તથાપિ વદ કથ્યતે ॥ ૧૮૩॥

રાજોવાચ ।
દેવી વિષ્ણોઃ પદં ત્યક્ત્વા ગત્વાપિ વિવરસ્થલમ્ ।
ઉદ્ધારય પિતૄણ્ પૂર્વાન્ ધરામણ્ડલવર્ત્મના ॥ ૧૮૪॥ (સર્વાન્)

અસ્તૌષં ભવતીં યચ્ચ તેન યઃ સ્તૌતિ માનવઃ ।
ન ત્યાજ્યઃ સ્યાત્ત્વયા સોઽપિ વર એષ દ્વિતીયકઃ ॥ ૧૮૫॥

દેવ્યુવાચ ।
એવમસ્તુ મહારાજ કન્યાસ્મિ તવ વિશ્રુતા ।
ભાગીરથીતિ ગેયાં સ્યાં વર એષોઽધિકસ્તવ ॥ ૧૮૬॥ (ગેયાં માં)

માં સ્તોષ્યતિ જનો યસ્તુ ત્વત્કૃતેન સ્તવેન હિ ।
તસ્યાઽહં વશગા ભૂયાં નિર્વાણમુક્તિદા નૃપ ।
શિવ આરાધ્યતાં રાજન્ શિરસા માં દધાતુ સઃ ॥ ૧૮૭॥

અન્યથાઽહં નિરાલમ્બા ધરાં ભિત્વાઽન્યથા વ્રજે ।
પૃથિવી ચ ન મે વેગં સહિષ્યતિ કદાચન ॥ ૧૮૮॥

સુમેરુશિર આરુહ્ય શઙ્ખધ્વાનં કરિષ્યસિ ।
તેન ત્વામનુયાસ્યામિ બ્રહ્માણ્ડકોટિભેદિની ॥ ૧૮૯॥

શુક ઉવાચ ।
ઇત્યુક્ત્વા સા તદા દેવી તત્રૈવાન્તરધીયત ॥ ૧૯૦॥

ભગીરથોઽપિ રાજર્ષિરાત્માનં બહ્વમન્યત ॥ ૧૯૧॥

॥ ઇતિ શ્રીબૃહદ્ધર્મપુરાણે મધ્યખણ્ડે ગઙ્ગાસહસ્રનામવર્ણને
પઞ્ચાશત્તમોઽધ્યાયઃ ॥

Notes :
Verses are not numbered strictly for two lines and are as per the printed text of available Brihaddharmapurana.
gagaNa is same as gagana as per dictionary
Variations are given to the right of the line where it is seen.

NA

*Shri Ganga Sahasranama stotram*

pdf was typeset on March 19, 2023

Please send corrections to *sanskrit@cheerful.com*